एकादशः पाठः

# पर्यटनम्

## (क) नासिकक्षेत्रम्

महाराष्ट्रदेशे पवित्रायाः गोदावरीनद्याः तीरे विलसति नासिकक्षेत्रम्। शूर्पणखायाः नासिका अत्रैव छिन्ना लक्ष्मणेन इत्यतः स्थानस्यास्य तत् नाम इति वदन्ति अत्रत्याः। नासिक इत्यपि कथ्यमानम् एतत् अनेकैः कारणैः प्रसिद्धम् अस्ति। गोदावर्याः एकस्मिन् पार्श्वे नासिकनगरं चेत् अपरस्मिन् पार्श्वे अस्ति पञ्चवटीक्षेत्रम्। कुम्भमेलः प्रचलति इति कारणतः नासिकक्षेत्रं प्रयागमिव हरिद्वारमिव पवित्रं मन्यन्ते श्रद्धालवः। द्वादशसु वर्षेषु एकदा प्रचलति अयं कुम्भमेलः। तदा तु क्षेत्रेऽस्मिन् भक्तानां तादृशः महापूरः भवति यत् कुत्रापि पदं निक्षेप्तुमपि स्थलं न लभ्यते। अग्रिमस्य कुम्भमेलस्य निमित्तं गतवर्षादेव सज्जातकार्याणि प्रचलन्ति सन्ति। गोदावरीं द्रष्टुं नदीतीरं गतवता मया विस्मयः प्रापः यतः तत्र जलमेव नासीत्। ततः कारणं ज्ञातं यत् कुम्भमेलस्य निमित्रं नद्याः तटयोः व्यवस्थाः कर्तुम् इदानीं तस्याः प्रवाहः अन्यत्र एव नीतः अस्ति इति। अतः श्रीरामकुण्डनामकात् स्थानात् अनन्तरं नद्याः पात्रं केवलं दृष्टं, न तु जलम्। नैके कर्मकाराः तत्र कार्यनिरताः आसन्।

श्रीरामकुण्डस्य पार्श्वे स्थिते कस्मिंश्चित् भवने सम्मिलिताः श्रद्धालवः धार्मिकेषु विधिषु निरताः आसन्। तत्पार्श्वस्थे भवने महात्मगान्धेः चिताभस्म सुरक्षितम् अस्ति। श्रीरामकुण्डस्य एतत् वैशिष्ट्यम् अस्ति यत् तत्रत्ये कस्मिंश्चित् निश्चिते स्थाने विसृष्टम् अस्थि काभिश्चित् एव घण्टाभिः द्रुतं भवति इति। वयं जानीमः यत् अस्थि जले सुखेन तु नैव द्रवति। अत्र तु तत् अल्पेन कालेन निश्शेषं विलीयते। अत्र अस्थिविसर्जनं महत् पुण्यकरमपि। अतः एव अत्र अस्थिविसर्जनं कर्तुं देशस्य नानाभागेभ्यः बहवः श्रद्धालवः समागच्छन्ति।

गोदावर्याः तीरे स्थितं त्र्यम्बकेश्वरमन्दिरं नारोशङ्करमन्दिरं नासिकस्य क्षेत्रस्य अपरे प्रेक्षणीये स्थाने। सरदारनारोशङ्करनामकेन 1747 तमे क्रिस्ताब्दे 18 लक्ष्यरूप्यकात्मकव्ययेन निर्मितम् एतत् मन्दिरं शिल्पकलादृष्ट्या अत्यन्तं विशिष्टम् अस्ति। देवालयस्य उपरि काचित् महती घण्टा प्रतिष्ठापिता अस्ति या पोर्चुगल्देशे निर्मिता इति श्रूयते। तस्याः ध्वनिः समग्रे नासिकनगरेऽपि श्रूयते स्म।

## अभ्यासः

1. धार्मिकदृष्ट्या नासिकक्षेत्रस्य वैशिष्ट्यं कीदृशम् अस्ति?
2. कुम्भमेला कुत्र-कुत्र लगति?
3. गोदावर्याः उभयोः पार्श्वयोः के-के क्षेत्रे स्तः?

### (ख) पञ्चवटी

पञ्चानां वटानां समाहारः पञ्चवटी–इति असकृत् पठितमेव अस्माभिः। तन्नाम्ना अभिधीयामाने स्थाने अद्यापि विलसन्ति पञ्च वटवृक्षाः। जीर्णानां पुरातनानां महावृक्षाणां स्थाने तन्मूलादेव उत्पन्नाः एते वृक्षाः न तथा महाकायाः सन्ति यथा अस्माभिः चिन्त्यन्ते। पञ्च संख्याभिः ते वृक्षाः निर्दिष्टाः अपि।

पञ्चवट्या पुरतः एव अस्ति सीतागुहा। यदा शूर्पणखायाः नासिकाच्छेदः जातः तदा अग्रे सम्भाव्यमानं राक्षसानाम् आक्रमणं विचिन्त्य श्रीरामः अस्यामेव गुहायां सीतां सुरक्षितरूपेण संस्थाप्य स्वयं च खरदूषणादिभिः चतुर्दशसहस्रराक्षसैः सह युद्धम् अकरोत्। शरीरं सङ्कोच्य गुहा प्रविष्टा चेत् अन्तः अधोभागे प्रतिष्ठापितानां सीतारामलक्ष्मणानां मूर्तीनां दर्शनं कर्तुं शक्यम्। परन्तु हा, यदि भवन्तः स्थूलकायाः, तर्हि नार्हन्ति गुहां प्रवेष्टुम्।

ततः एव अन्यां गुहां प्रवेष्टुं मार्गः अस्ति। तस्यां च गुहायां भगवतः पञ्चरत्नेश्वरस्य महालिङ्गम् अस्ति। भगवान् श्रीरामः स्वहस्ताभ्याम् अस्य अर्चनम् अकरोत् इति वदन्ति अत्रत्याः। द्वयोः अपि अनयोः गुहयोः दर्शनम् महान्तम् आनन्दं जनयति। तत्पुरतः एव स्थलं किञ्चित् प्रदर्श्यते यत्र मारीचः हतः इति जनाः कथयन्ति।

कालाराममंदिरम् अत्रत्यम् अपरं प्रेक्षणीयं स्थानम्। विशाले सुन्दरे च अस्मिन् मन्दिरे भगवतः श्रीरामस्य कृष्णशिलानिर्मिता मूर्तिः अस्ति। डा० भीमराव अम्बेदकरः अस्मिन् एव मन्दिरे हरिजनानां प्रवेशं कारयितुम् आन्दोलनम् कृतवान् आसीत्।

## अभ्यासः

1. पञ्चवट्या धार्मिकमहत्वं लिखत।
2. कालाराममंदिरे हरिजनानां प्रवेशं कारयितुं कः आन्दोलनं कृतवान् आसीत्?
3. सीतागुहासम्बद्धा का कथा प्रसिद्धा?
4. सीतागुहायां केषां प्रतिमाः प्रतिष्ठापिताः?

★★★